**B.A. (Honours) Examination 2017**
**Semester-II**
**Sanskrit (Honours)**
**Course : H-3**
**(Kumārasambhavam, Raghuvaṁsam)**

**Time : 3 Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. "न विश्वमूर्त्तेरवधार्यते वपुः"— केन प्रसङ्गेन कं प्रति कस्या उक्तिरियम्? सरलसुरगिरा द्वयोः कथोपकथनं कुमारसम्भवोक्तदिशा वर्णयत। 2+8=10

अथवा

कुमारसम्भवे कति सर्गाः सन्ति? तत्र पञ्चमसर्गस्य किं नाम? कथं पार्वती तपश्चचार? तस्याः तपसः साफल्यं कालिदासोक्तदिशा सरलसंस्कृतेन विवृणुत। 1+1+2+6=10

2. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा अनुवदत— 4

(क) स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः।।

अथवा

(ख) पुनर्ग्रहीतुं नियमस्थया तया द्वयोऽपि निक्षेप इवार्पितं द्वयम्।
लतासु तन्वीषु विलासचेष्टितं विलोलदृष्टं हरिणाङ्गनासु च।।

3. निम्नोद्धृतयोः श्लोकयोः एकतरस्य प्रसङ्गनिर्देशपूर्वकं संस्कृतेन व्याख्यानं कुरुत— 6

(क) कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन्न धर्मवृद्धेषु वयः समीक्ष्यते।।

(ख) शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।
विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत।।

4. पुष्पकविमानेन गच्छन् रामचन्द्रः सीतामुद्दिश्य प्रथमं कस्य महिमानं वर्णितवान्? तत्रस्थानां वस्तूनां परिचयं रघुवंशस्य त्रयोदशसर्गोक्तदिशा सरलसंस्कृतेनोपस्थापयत। 10

अथवा

माल्यवतः सुतीक्ष्णस्य आश्रमं यावत् वर्णनं कालिदासोक्तदिशा सरलसंस्कृतेनोपस्थापयत।

5. बङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा अनुवदत— 4

(क) एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः।
प्राप्ता मुहूर्तेन विमानवेगात् कूलं फलावर्जितपूगमालम्।।

अथवा

(ख) ससत्त्वमादाय नदीमुखाम्भः सम्मीलयन्तो विवृताननत्वात्।
अमी शिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान्।।

6. प्रसङ्गनिर्देशपुरःसरमेकस्य श्लोकस्य व्याख्या सुरगिरा कार्या— 6

(क) गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरङ्गे।
तदर्थमूर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः।।

(ख) नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते।।